Die Heiligen-Hetäre

भगवदज्जुकम्

Eine indische Yoga-Komödie

P. Kirchheim Verlag

Originaltitel: भगवदज्जुकम् (= *Bhagavadajjukam*)

Übersetzt und mit Anmerkungen versehen von
Ulrike Roesler, Jayandra Soni, Luitgard Soni,
Roland Steiner und Martin Straube.

Sanskrit- und Prakrit-Text herausgegeben von
Roland Steiner und Martin Straube.

Mit einem Nachwort von Roland Steiner.

Die teilweise erstmals veröffentlichten farbigen Abbildungen
sowie das für den Umschlag verwendete Foto
stammen von Monika Zin.

Das Signet zeigt eine aus Maharashtra (Westindien) stammende stilisierte Zeichnung des elefantenköpfigen indischen Gottes Ganēscha. Ganēscha ist im Pantheon des Hinduismus für die Gelehrten und Studenten sowie für alle Hindernisse und deren Beseitigung zuständig. Er wird daher traditionell zu Beginn insbesondere literarischer Unternehmungen um Beistand gebeten. Die Besonderheit dieser Zeichnung besteht darin, daß sie um 180° gedreht als die heilige Silbe *Om* gelesen werden kann.

Das Werk einschließlich aller seiner Teile ist urheberrechtlich geschützt. Jede Verwertung außerhalb der engen Grenzen des Urheberrechtsgesetzes ist ohne Zustimmung des Verlages unzulässig und strafbar. Das gilt insbesondere für Vervielfältigungen, Übersetzungen, Mikroverfilmungen und die Einspeicherung und Verarbeitung in elektronische Systeme.

ISBN-10 3-87410-106-1
ISBN-13 978-3-87410-106-6
© 2006 P. Kirchheim Verlag, München
Umschlaggestaltung:
Cornelia Hamberger, DOUBLEJU.DESIGN
Satz: Martin Straube
Gesamtherstellung: Interpress, Budapest
Printed in Hungary

www.kirchheimverlag.de

in memoriam

Otto Stein

21. Oktober 1893 Saaz

Frühjahr 1942 Ghetto Łódź

नान्द्यन्ते ततः प्रविशति सूत्रधारः ।

सूत्रधारः ।

त्वां पातु लक्षणाढ्यः सुरवरमुकुटेन्द्रचारुमणिघृष्टः ।
रावणनमिताङ्गुष्ठो रुद्रस्य सदार्चितः पादः ॥ १ ॥

इदमस्मदीयं गृहम् । यावत्प्रविशामि । प्रविश्य । विदूषक विदूषक ।

प्रविश्य **विदूषकः** । अय्य । अअ म्हि ।

सूत्रधारः । विजनं तावत् । यावत्ते प्रियमाख्यास्यामि ।

विदूषकः । अय्य । तह । निष्क्रम्य प्रविश्य । इदं विअणं । पिअं दाव अय्यो आचक्खदु ।

सूत्रधारः । श्रूयताम् । अद्यास्मि बहिर्नगरादागच्छतानेकसिद्धादेशजनित-प्रत्ययेन लक्षणिना ब्राह्मणेनाहमादिष्टः । अद्य सप्तमे ऽहनि तव राजकुले प्रेक्षा भविष्यति । ततस्त्वत्प्रयोगपरितुष्टेन राज्ञा दत्तां महतीं श्रियमवाप्स्यसीति । तस्य ब्राह्मणस्यामिथ्यादेशितया जनितोत्साहः सङ्गीतकं करिष्यामि ।

विदूषकः । कदमं दाणि अय्येण णाडअं णाडीअदि ।

सूत्रधारः । अत्रैव मे चिन्ता । अथ तु नाटकप्रकरणोद्भवासु वारेहामृगडिमसमवकारव्यायोगभाणसल्लापवीथ्युत्सृष्टिकाङ्कप्रहसनादिषु दशजातिषु नाट्यरसेषु हास्यमेव प्रधानमिति पश्यामि । तस्मात्प्रहसनमेव प्रयोक्ष्यामि ।

विदूषकः । अय्य । अहं हस्सो वि पहसणं ण आणे ।

सूत्रधारः । तेन तु शिक्षतु भवान् । न शक्यमशिक्षितेन किञ्चिदपि ज्ञातुम् ।

विदूषकः । तेण हि अय्यो एव्व मे उवदिसदु ।

सूत्रधारः । बाढम् ।

ज्ञानार्थं कृतबुद्धिः सन्मार्गेणानुगच्छ गच्छन्तम् ।

नेपथ्ये । शाण्डिल्य शाण्डिल्य ।

सूत्रधारः । श्रुत्वा ।

योगेश्वरं द्विजवृषं शिष्य इवेमं परिव्राजम् ॥ २ ॥

निष्क्रान्तौ

॥ आमुखम् ॥

ततः प्रविशति परिव्राजकः ।

परिव्राजकः । शाण्डिल्य शाण्डिल्य । पृष्ठतो विलोक्य । न तावद्दृश्यते । सदृशमस्य तमोवृतस्य । कुतः ।

देहो रोगनिधिर्जरावशगतो लीनान्तकाधिष्ठितो
यो नित्यप्रतिघातरुद्धविषयस्तीरे यथा पादपः ।
तं लब्ध्वा सुकृतैरनेकगुणितैर्देहात्मना विस्मितो
मत्तो यो बलरूपयौवनगुणैर्दोषान्न तान्पश्यति ॥ ३ ॥

तस्मादनपराद्धः खल्वयं तपस्वी । पुनरपि समाह्वानं करिष्ये । शाण्डिल्य शाण्डिल्य ।

ततः प्रविशति शाण्डिल्यः ।

शाण्डिल्यः । भो । पुठमं एव्व अहं करडुअसेससमिद्धे णिरक्खरप्पक्खित्त-जीहे कण्ठप्पसत्तजण्णोववीदे बम्हण्णमत्तपरितुट्ठे कुले पसूदो । तदो दुद्दीअं अम्हाणं गेहे असणणासेण बुभुक्खिदो पादरसणलोहेण सक्किअ-समणअं पव्वजिदो म्हि । तदो तहिं दासीए वुत्ताणं एक्ककालभत्तत्तणेण बुभुक्खिदो तं पि विसज्जिअ चीवरं छिन्दिअ पत्तं पतोलिअ छत्तमत्तं

गण्हिअ णिग्गदो म्हि । तदो तिदीअं इमस्स दुट्ठाचय्यस्स भण्डभारगद्दभो संवुत्तो । ता अदूरगदं भअवन्तं सम्भावेमि । कहिं णु खु गदो भअवो । आ । एसो दुट्ठलिङ्गी पादरसणलोहेण एआई भिक्खं आहिण्डिदुं पुव्वं गदो त्ति तक्केमि । परिक्रम्य दृष्ट्वा । एसो खु भअवो । उपगम्य । मरिसेदु मरिसेदु भअवो ।

परिव्राजकः । शाण्डिल्य । न भेतव्यं न भेतव्यम् ।

शाण्डिल्यः । भो भअवं । इमस्सिं जीवलोए णिच्चोच्छवविसेसे सुहप्पहाणे केण विहिणा भिक्खं आहिण्डदि भअवो ।

परिव्राजकः । शृणु ।

अमानकामः सहितव्यधर्षणः
कृशाञ्जनाद्भैक्षकृतात्मधारणः ।
चरामि दोषव्यसनोत्तरं जगद्
ध्रदं बहुग्राहमिवाप्रमादवान् ॥ ४ ॥

शाण्डिल्यः । भो भअवं ।

ण मामओ अत्थि ण भादुओ वा
पिदा कुदो मे भअवप्पसादो ।
एक्को अहं अण्णहदत्तणेण
जहिं पविट्ठो ण खु धम्मलोहा ॥ ५ ॥

परिव्राजकः । शाण्डिल्य । किमेतत् ।

शाण्डिल्यः । णं भूदत्थो अलिअं बन्धअं ति भअवो भणादि ।

परिव्राजकः । अथ किम् । सत्यमनृतं चाभिसन्धाय कृतं बन्धकं भवति ।

यदा तु सङ्कल्पितमिष्टमिष्टतः
करोति कर्मावहितेन्द्रियः पुमान् ।
तदास्य तत्कर्मफलं सदा सुरैः
सुरक्षितो न्यास इवानुपाल्यते ॥ ६ ॥

शाण्डिल्यः । कदा णु खु तस्स फलं लहदि ।

परिव्राजकः । यदा विरागमैश्वर्यं लभते ।

शाण्डिल्यः । तं पुण कहं लहदि ।

परिव्राजकः । असङ्गतया ।

शाण्डिल्यः । किं पुण एदं असङ्गद त्ति पुच्छदि ।

परिव्राजकः । रागद्वेषयोर्मध्यस्थता । कुतः ।

सुखेषु दुःखेषु च नित्यतुल्यतां
भयेषु हर्षेषु च नातिरिक्तताम् ।
सुहृत्स्वमित्रेषु च भावतुल्यतां
वदन्ति तां तत्त्वविदो ह्यसङ्गताम् ॥ ७ ॥

शाण्डिल्यः । एदं पुण अत्थि ।

परिव्राजकः । नासतः सञ्ज्ञा भवति ।

शाण्डिल्यः । किं सक्कं कत्तुं ति भअवो भणादि ।

परिव्राजकः । कः संशयः ।

शाण्डिल्यः । अलिअं अलिअं एदं ।

परिव्राजकः । कथमिव ।

शाण्डिल्यः । भअवो खु दाव किस्स मं कुप्पदि ।

परिव्राजकः । नाधीष इति ।

शाण्डिल्यः । जइ अहं अहीआमि वा णाहीआमि वा किं तव मुत्तस्स ।

परिव्राजकः । मा मैवम् । अभ्युपगतशिष्यार्थं ताडनं स्मृतमिति । तस्माद्-कुपितश्चाहं श्रेयोऽर्थं भवन्तं ताडयामि ।

शाण्डिल्यः । अच्छेरं अच्छेरं । अकुविदो णाम मं ताडेदि । छिन्दीअदु एसा कहा । अदिक्कमदि भिक्खवेला ।

परिव्राजकः । मूर्ख । प्रातस्तावन्न मध्याह्नः । न्यस्तमुसले व्यङ्गारे सर्वभुक्त-जने काल इत्युपदेशः । तस्माद्विश्रमार्थमिदमुद्यानं प्रविशावः ।

शाण्डिल्यः । हा हा । पडिञ्ञाहाणिओ किल भअवो ।

परिव्राजकः । कथमिव ।

शाण्डिल्यः । णं समसुखदुक्खो किल भअवो ।

परिव्राजकः । अथ किम् । समसुखदुःखो ममात्मा । कर्मात्मा विश्रम-मिच्छति ।

शाण्डिल्यः। भो भअवं । को एसो अत्ता णाम । को अण्णो कम्मत्ता णाम ।

परिव्राजकः । शृणु ।

यः स्वप्ने गगनमुपैति सो ऽन्तरात्मा
सो ऽप्यात्मा विधिविहितं प्रयाति यश्च ।
देहो ऽयं नर इति सञ्ज्ञितो ऽन्यथा वा
कर्मात्मा श्रमसुखभाजनं नराणाम् ॥ ८ ॥

शाण्डिल्यः । जो अजरो अमरो अच्छेज्जो अभेज्जो सो अत्ता णाम । जो हसदि

हासेदि सअदि भुञ्जदि विलअं च गच्छदि सो कम्मत्ता णाम ।

परिव्राजकः । यथा ग्राह्यं तथा गृहीतम् ।

शाण्डिल्यः । आ । अवेहि । अभिग्गहिदो सि ।

परिव्राजकः । कथमिव ।

शाण्डिल्यः । णं सो एव्व दाणि एसो । णहि सरीरं विणा अत्थि किम्पि ।

परिव्राजकः । लौकिकमभिहितम् । यतश्च भेदमुपगतानां सत्त्वानां स्थानानि श्रूयन्ते । अत एवं ब्रूमः ।

शाण्डिल्यः । सव्वं दाव चिट्ठदु । तुवं दाव को ।

परिव्राजकः । शृणु ।

> खपवनसलिलानां तेजसश्चैकदेशाद्
> उपचितचलमूर्तिः पार्थिवद्रव्यराशिः ।
> श्रवणनयनजिह्वानासिकास्पर्शवेदी
> नर इति कृतसञ्ज्ञः को ऽप्यहं प्राणिधर्मा ॥ ९ ॥

शाण्डिल्यः । हा हा । एत्तिअमत्तेण अत्ताणं पि ण आणादि । किं पुण अत्ताणं । भो भअवं । इदं उय्याणं ।

परिव्राजकः । प्रविशाग्रतः । विविक्तशरणारण्यप्रतिश्रया वयम् ।

शाण्डिल्यः । भअवं एव्व पुरदो पविसदु । अहं पिट्ठदो पविसामि ।

परिव्राजकः । किमर्थम् ।

शाण्डिल्यः । † पोलाअणीए † मम मादाए सुदं असोअपल्लवन्तलणिलुक्को वग्घो पडिवसदि त्ति । ता भअवं एव्व पुरदो पविसदु । अहं पिट्ठदो पविसामि ।

परिव्राजकः । बाढम् ।

प्रविशतः ।

शाण्डिल्यः । अविहा । वग्घेण गहिदो म्हि । मोएध मं वग्घमुहादो । अणाहो विअ वग्घेण खाइदो म्हि । इदं खु लुहिलं पस्सवदि कण्ठादो ।

परिव्राजकः । शाण्डिल्य । न भेतव्यं न भेतव्यम् । मयूरः खल्वेषः ।

शाण्डिल्यः । सच्चं मोरो ।

परिव्राजकः । अथ किम् । सत्यं मयूरः ।

शाण्डिल्यः । जइ मोरो उग्घाडेमि अक्खिणी ।

परिव्राजकः । छन्दतः ।

शाण्डिल्यः । अविहा । दासीए वुत्तो वग्घो मब्भएण मोररूवं गण्हिअ पलाअदि । उद्यानं विरूप्य । ही ही । चम्पअअज्जुणकदम्बणीवणिउलतिलअकण्णिआरकुरवअकप्पूरचूदपिअङ्गुसालताल तमालपुण्णाअणाअबउलसरलसज्जसिन्दुवारतिणसुल्लसत्तवण्णकणवीरकुडअवण्हिचन्दणासोअमल्लिआणन्दिवत्ततअरखदिरकदलीसमवइण्णं वसन्तोवसोहिदप्पवालपत्तपल्लवकुसुममञ्जरीसमाउलं अदिमुत्तमाहवीलदामण्डवमण्डिदं मोरकोइलमत्तब्भमरमहुरारावसङ्घुट्टं पिअजणविप्पओअसमुप्पण्णसोआभिभूदजुवदीजणाणुदावअरं सम्पउत्ताणं सुहावहं अहो रमणिज्जं खु इदं उय्याणं ।

परिव्राजकः । मूर्ख । अहन्यहनि हीयमानेष्विन्द्रियेषु किं ते रमणीयम् । कुतः ।

अभ्यागतः किसलयाभरणो वसन्तः
प्राप्ता शरत्कुमुदषण्डविभूषणेति ।
बालो नवेष्वृतुषु रज्यति नाम लोके
यज्जीवितं हरति तत्किल रम्यमस्य ॥ १० ॥

शाण्डिल्यः । जं जदा रमणिज्जं तं तदा रमणिज्जं ति पुच्छदि ।

परिव्राजकः । अपाण्डित्यमभिहितम् । पश्य ।

अनागतं प्रार्थयतामतिक्रान्तं च शोचताम् ।
वर्तमानैरतुष्टानां निर्वाणं नोपपद्यते ॥ ११ ॥

शाण्डिल्यः । आअदमाणो पन्था । कहिं दाणि उवविसामो ।

परिव्राजकः । इहैवासिष्यावहे ।

शाण्डिल्यः । अचोक्खं अचोक्खं ।

परिव्राजकः । मेध्यमरण्यमदूष्या भूः ।

शाण्डिल्यः । जदा परिस्सन्तो उवविसदुकामो तदा अचोक्खं चोक्खं वा करेसि ।

परिव्राजकः । श्रुतिः प्रमाणं नाहम् । कुतः ।

अतिमानोन्मत्तानामहिते हितमिति कृतप्रतिज्ञानाम् ।
नैवास्ति परं तेषां स्वच्छन्दकृतप्रमाणानाम् ॥ १२ ॥

शाण्डिल्यः । अप्पमाणं तुह एदं बहुअं मन्तअन्तस्स ।

परिव्राजकः । मा मैवम् ।

प्रमाणं कुरु यल्लोके प्रमाणीक्रियते बुधैः ।
नाप्रमाणं प्रमाणस्थाः करिष्यन्तीति निश्चयः ॥ १३ ॥

शाण्डिल्यः । ण खु दे पमाणं जाणामि ।

परिव्राजकः । आगच्छ वत्स । अधीष्व तावत् ।

शाण्डिल्यः । ण दाव अज्झइस्सं ।

परिव्राजकः । किमर्थम् ।

शाण्डिल्यः । अज्झअणस्स दाव अत्थं सोदुं इच्छामि ।

परिव्राजकः । अधीताध्ययनैरपि कालान्तरविज्ञेया भवन्त्यध्ययनार्थाः । तस्माद्धीष्व तावत् ।

शाण्डिल्यः । अधीदे किं भविस्सदि ।

परिव्राजकः । श्रृणु । ज्ञानाद्भवति विज्ञानम् । विज्ञानात्संयमः । संयमात्तपः । तपसो योगप्रवृत्तिः । योगप्रवृत्तेरतीतानागतवर्तमानतत्त्वदर्शनं भवति । एतेभ्यो ऽष्टगुणमैश्वर्यं लभते ।

शाण्डिल्यः । भो भअवं । अप्पच्चक्खे जहाकामं मम बुद्धिं परिभविअ भणासि । सक्कं पुण अदिट्ठे भअवादो परगेहाणि पविसिदुं ।

परिव्राजकः । किमभिप्रेतं भवतः ।

शाण्डिल्यः । मम अभिप्पेदं सक्किअसमणआणं कारणादो सुसाधिदाणि सङ्कप्पवुत्ताणि भोअणाणि अण्हिदुं ।

परिव्राजकः । अकाल्यं वर्तते लोभः ।

शाण्डिल्यः । एदस्स कारणादो तुवं मुण्डिदो सि ।

परिव्राजकः । मा मैवम् ।

महात्मभिः सेवितपूजितं द्विजैः
सुरासुराणामपि बुद्धिसंमतम् ।
अवार्यमक्षोभ्यमचिन्त्यमव्ययं
महन्मया योगफलं निषेव्यते ॥ १४ ॥

शाण्डिल्यः । भो भअवं । जोओ जोओ त्ति पव्वाजआ बहुअं मन्तअन्ति । को एसो जोओ णाम ।

परिव्राजकः । शृणु ।

ज्ञानमूलं तपःसारं सत्त्वस्थं द्वन्द्वनाशनम् ।
मुक्तं द्वेषाच्च रागाच्च योग इत्यभिधीयते ॥ १५ ॥

शाण्डिल्यः । आहारप्पमादो सव्वप्पमादो त्ति मन्तअन्तस्स णमो भअवदो बुद्धस्स ।

परिव्राजकः । शाण्डिल्य । किमेतत् ।

शाण्डिल्यः । भअवं । किं ण आणासि । पुठमं एव्व अहं पादरसणलोहेण सक्किअसमणअं पव्वजिदो म्हि ।

परिव्राजकः । अस्ति किञ्चिदपि ज्ञातम् ।

शाण्डिल्यः । अत्थि अत्थि । पभूदं पि अत्थि ।

परिव्राजकः । भवतु । श्रोष्यामस्तावत् ।

शाण्डिल्यः । सुणादु भअवो । अष्टौ प्रकृतयः । षोडशविकाराः । आत्मा । पञ्च वायवः । त्रैगुण्यम् । मनः । सञ्चरः । प्रतिसञ्चरश्चेति । एव्वं भअवदा जिणेण पिडअपुत्थएसु उत्तं ।

परिव्राजकः । शाण्डिल्य । साङ्ख्यसमय एष न शाक्यसमयः ।

शाण्डिल्यः । बुभुक्खाए ओदणगदाए चिन्ताए अञ्ञं चिन्तिदं अञ्ञं मन्तिदं। दाणिं सुणादु भअवो । पाणादिपादादो वेरमणी सिक्खापदं । अदिण्णादाणादो वेरमणी सिक्खापदं । अब्बम्हचय्यादो वेरमणी सिक्खापदं । मुधा-

वादादो वेरमणी सिक्खापदं । विआलभोअणादो वेरमणी सिक्खापदं । अम्हाणं बुद्धं धम्मं सङ्घं सरणं गच्छामि ।

परिव्राजकः । शाण्डिल्य । स्वसमयमतिक्रम्य परसमयं वक्तुं नार्हति भवान् ।

तमस्त्यक्त्वा रजो जित्वा सत्त्वस्थः सुसमाहितः ।
ध्यातु शीघ्रं भवान्ध्यानमेतज्ज्ञानप्रयोजनम् ॥ १६ ॥

शाण्डिल्यः । भअवो सुसमाहिदो जोअं चिन्तेदु । अहं सुसमाहिदो ओदणं चिन्तेमि ।

परिव्राजकः । छिद्यतामेषा कथा ।

सर्वं जगत्सङ्क्षिप देहबन्धे
यथेन्द्रियाण्यात्मनि योजयित्वा ।
ज्ञानेन सत्त्वं समुपाश्रय त्वं
देहात्मनात्मानमवेक्ष्य कृत्स्नम् ॥ १७ ॥

ततः प्रविशति गणिका चेट्यौ च ।

गणिका । हञ्जे महुअरिए महुअरिए । कहिं कहिं रामिलओ ।

चेटी । अज्जुए । अअं आअछामि त्ति भणिअ णअरं एव्व पविट्ठो आवुत्तो ।

गणिका । हञ्जे । किं णु खु भवे ।

चेटी । किं अञ्ञं गोट्ठिं तुवारेदुं ।

गणिका । दाणिं पि ण पय्यत्ता गोट्ठी ।

चेटी । सुट्ठु अज्जुआ भणादि । आसवो एव्व गोट्ठी जो मत्तावेदि हस्सावेदि लज्जाधीरं पि इत्थिआजणं ।

गणिका । गच्छ । तुवारेहि णं ।

चेटी । अज्जुए । तह । निष्क्रान्ता ।

गणिका । हञ्जे परहुदिए परहुदिए । कहिं कहिं उवविसामो ।

चेटी । अज्जुए । एदस्सिं कुसुमिदसहआरतिलअमण्डिदे सिलापट्टए मुहुत्तअं उवविसिअ एक्कं वत्थुअं गाअदु अज्जुआ ।

गणिका । एव्वं होदु ।

उभे उपविश्य गायति ।

परभृतमधुकरनादज्याघोषः काम एष उद्याने ।
तिष्ठति सहकारशरो मुह्यति नूनं मनो ऽपि मुनेः ॥ १८ ॥

शाण्डिल्यः । आकर्ण्य । अए । कोइलरवो । पुनर्विभाव्य । ण खु अअं कोइलरवो । पाअसे घिदं पक्खित्तं विअ अइमहुरो को वि गीअरवो । होदु पेक्खामि दाव । विलोक्य । अविहा । का णु खु एसा तरुणी दस्सणीआ अणवरोहेण अलङ्कारेण अलङ्किदा इमस्स उय्याणस्स अलङ्कारो विअ उवविट्ठा ।

चेटी । अज्जुए ।

शाण्डिल्यः । अइ । गणिआ खु इअं । धञ्ञा खु सघणा ।

चेटी । दुदीअं पि एक्कं वत्थुअं गाअदु अज्जुआ ।

गणिका । तह । पुनर्गायति ।

मधुमासजातदर्पः कन्दर्पः कामिनीकटाक्षसखः ।
अपि योगिनामिह मनो विध्यति फुल्लैरशोकशरैः ॥ १९ ॥

शाण्डिल्यः । अइमहुरं पस्सवदि कण्ठादो । सुणादु भअवो ।

परिव्राजकः । शब्दप्रयोजनं श्रोत्रम् । प्रसङ्गमत्र न गच्छामि ।

शाण्डिल्यः । पसङ्गं पि सम्पदं करेसि जइ से कारिसापणा भवे ।

परिव्राजकः । आ । अपेहि । युक्तव्यवहारी भव ।

शाण्डिल्यः । मा कुप्प । अजुत्तं पव्वाजआणं कुप्पिदुं ।

परिव्राजकः । एष न व्यवहरामि ।

शाण्डिल्यः । दाणिं पण्डिदो सि ।

ततः प्रविशति यमपुरुषः ।

यमपुरुषः । एष भोः ।

भूतानि यो हरति कर्महतानि लोके
यः प्राणिनां सुकृतदुष्कृतकर्मसाक्षी ।
उक्तो ऽस्मि तेन शमनेन यमेन देहे
प्राणान्प्रजावधिविधौ विनियोजयेति ॥ २० ॥

तस्मात् ।

नानाराष्ट्रनदीवनाचलवतीं भूमिं समालोकयन्
मेघैस्तोयभरावनम्रनिचयैः प्रच्छाद्यमानो भृशम् ।
तीर्त्वा चारणसिद्धकिन्नरयुतं वातोद्धताभ्रं नभः
सम्प्राप्तो ऽस्मि यमेन यत्र विहितस्तर्कादिवाहं पुरम् ॥ २१ ॥

तत्क नु खलु सा । अये । इयं सा ।

सपल्लवैस्तप्तसुवर्णवर्णैर्
अशोकपुष्पस्तबकैर्मनोज्ञैः ।
अन्तर्हिता भाति वराङ्गनैषा
सन्ध्याभ्रजालैरिव चन्द्रलेखा ॥ २२ ॥

भवतु । अस्त्यस्याः कर्मावशेषः । मुहूर्तं स्थित्वा प्राणान्हरामि ।

चेटी । अज्जुए । दस्सणीओ खु एसो असोअकिसलओ । णं गण्हामि ।

गणिका । मा मा एव्वं । अहं एव्व गण्हामि ।

यमपुरुषः । अयं स देशकालः । यावत्सर्पत्वमुपगम्याशोकशाखायां स्थित्वास्याः प्राणान्हरामि । तथा कुर्वन् । अयमिदानीम् ।

श्यामां प्रसन्नवदनां मधुरप्रलापां
मत्तां विशालजघनां वरचन्दनार्द्राम् ।
रक्तोत्पलाभनयनां नयनाभिरामां
क्षिप्रं नयामि यमसादनमेव बालाम् ॥ २३ ॥

गणिका पल्लवापचयं करोति ।

यमपुरुषः । अयं सन्दंशकालः ।

गणिका । हं । केण वि दट्ठ म्हि ।

चेटी । अम्महे । एसो सो असोअकोडरन्तरिदो वालो ।

गणिका । हं । वालो । इति पतिता ।

शाण्डिल्यः । उपगम्य । भोदि । किं एदं ।

चेटी । अय्य । एसा अज्जुआ वालेण दट्ठा ।

शाण्डिल्यः । अविहा । भो भअवं । एसा गणिआ दारिआ वालेण दट्ठा ।

परिव्राजकः । क्षीणेनास्याः कर्मणा भवितव्यम् । कुतः ।

स्वकर्म भोक्तुं जायन्ते प्रायेणैव हि जन्तवः ।
क्षीणे कर्मणि चान्यत्र पुनर्गच्छन्ति देहिनः ॥ २४ ॥

चेटी । अज्जुए । किं बाधेदि ।

गणिका । सीददि विअ मे सरीरं । उब्भमन्ती विअ मे दिट्ठी । आउलिअं विअ मे हिअअं । णिग्गच्छन्ति विअ मे पाणा । सइदुं इच्छामि ।

चेटी । सुहं सअदु अज्जुआ ।

गणिका । अत्तं अभिवादेहि ।

चेटी । मा मा एव्वं । सअं एव्व अत्तं अभिवादेहि ।

गणिका । रामिलअं आलिङ्गेहि । इति मूर्च्छिता ।

चेटी । हा । हदा खु अज्जुआ ।

यमपुरुषः । हन्त । हृताः प्राणाः । एष भोः ।

गङ्गामुत्तीर्य विन्ध्यं शुभसलिलवहां नर्मदामेष सह्यं
गोलेयीं कृष्णवेण्णां पशुपतिभवनं सुप्रयोगां च काञ्चीम् ।
कावेरीं ताम्रपर्णीमथ मलयगिरिं सागरं लङ्घयित्वा
वेगादुत्तीर्य लङ्कां पवनसमगतिः प्राप्तवान्धर्मदेशम् ॥ २५ ॥

अयं विशालशाखो वटवृक्षः । अत्रासीनं चित्रगुप्तं नयामि । निष्क्रान्तः ।

चेटी । हा अज्जुए ।

शाण्डिल्यः । भअवं । परित्तजदि एसा गणिआ दारिआ अत्तणो पाणाणि ।

परिव्राजकः । मूर्ख । परमप्रियाः प्राणिनां प्राणाः । प्राणैस्तु परित्यज्यते शरीरमिति वक्तव्यम् ।

शाण्डिल्यः । आ । अपेहि । अअरुण णिस्सिणेह कक्कसहिअअ दुट्ठबुद्ध भिण्णचारित्त कूरसअड मुहामुण्ड ।

परिव्राजकः । किमभिप्रेतं भवतः ।

शाण्डिल्यः । णामट्ठसदं दे पूरइस्सं ।

परिव्राजकः । छन्दतः ।

शाण्डिल्यः । भो भअवं । दुक्खिदो म्हि ।

परिव्राजकः । किमर्थम् ।

शाण्डिल्यः । अम्हाणं सअणो एसा ।

परिव्राजकः । कथं स्वजनो नाम ।

शाण्डिल्यः । एसा पव्वाजिआ विअ ण कहिञ्चि सिणेहं करेदि ।

परिव्राजकः । दुर्लभस्नेहो ऽपि भूयोऽर्थयोगात्स्निह्यतीति युक्तम् । कुतः ।

ये निर्ममा मोक्षमनुप्रपन्नाः
शास्त्रोपदिष्टेन पथा प्रयान्ति ।
तेषामपि प्रीतिपराङ्मुखानां
गुणेष्वपेक्षां हृदयं करोति ॥ २६ ॥

शाण्डिल्यः । भो भअवं । ण सक्कुणोमि अत्ताणं धारेदुं । उवसप्पिअ रोदामि ।

परिव्राजकः । न खलु न खलु गन्तव्यम् ।

शाण्डिल्यः । मा कुप्प । अजुत्तं पव्वाजआणं कुप्पिदुं । उपसृत्य । हा अज्जुए । हा पिअसम्पण्णे । हा महुरगाइणि ।

चेटी । अय्य । किं एदं ।

शाण्डिल्यः । भोदि । सिणेहो ।

चेटी । आत्मगतम् । जुज्जदि सव्वाणुकम्पी साहुजणो णाम ।

शाण्डिल्यः । भोदि । आमिस्सामि दाव णं ।

चेटी । पभवदि अय्यो ।

शाण्डिल्यः । हा भोदि । पादौ स्पृशति ।

चेटी । मा मा पादाणि आमिस्सिदुं ।

शाण्डिल्यः । आ । आउल म्हि । सीसं पादं पि ण आणामि । एदाणि तालफलपीणाणि कालेअचन्दणाणुलित्ताणि थणाणि अणहोमुहाणि तत्त-होदीए अधणस्स मम जीवन्तीए ण आसादिदाणि ।

चेटी । आत्मगतम् । एव्वं दाव करिस्सं । प्रकाशम् । अय्य । अज्जुअं मुहुत्तअं पडिवालेहि । जाव अत्तं आणेमि ।

शाण्डिल्यः । गच्छ सिग्घं । अहं अत्ता अणत्ताणं ।

चेटी । आत्मगतम् । साणुक्कोसो एसो बम्हणो अज्जुअं ण परिच्चअदि । जाव गच्छामि । निष्क्रान्ता ।

शाण्डिल्यः । गदा एसा । सेरं रोदामि । हा अज्जुए । हा महुरगाइणि ।

परिव्राजकः । शाण्डिल्य । न कर्तव्यमेतत् ।

शाण्डिल्यः । आ । अपेहि णिस्सिणेह । मं पि तुमं विअ तक्केसि ।

परिव्राजकः । आगच्छ वत्स । अधीष्व तावत् ।

शाण्डिल्यः । भअवं । किं । चिइच्छीअदु दाव एसा अणाहा तवस्सिणी ।

परिव्राजकः । किमौषधशास्त्रं भवतः ।

शाण्डिल्यः । अघं दे जोअस्स फलं ।

परिव्राजकः । आत्मगतम् । एष खलु तपस्वी कर्तव्याबोध्यतयाश्रमापवादं न जानाति । किञ्चिच्छ्रुतं महेश्वरादिभिर्योगाचार्यैः शिष्यानुक्रोशः सङ्गं न बाधत इति । तदस्य प्रत्ययोत्पादनं करिष्यामीदृशो योग इति । अस्या गणिकायाः शरीर आत्मानं योजयामि । योगेनाविष्टः ।

गणिका । उत्थाय । शाण्डिल्य शाण्डिल्य ।

शाण्डिल्यः । सहर्षं । अविहा । पच्चाअदप्पाणा खु एसा । भोदि । अअ म्हि ।

गणिका । अप्रक्षालितपाणिभ्यां मा स्प्राक्षीः ।

शाण्डिल्यः । अविहा । अदिचोक्खिणी खु इअं ।

गणिका । एहि वत्स । अधीष्व तावत् ।

शाण्डिल्यः । इह वि अज्झअणं । भअवन्तं एव्व उवसप्पामि । उपसृत्य । भो भअवं । अइ । मुदो भअवो । हा वाआलअ । हा अदिजोअवित्तअ । हा उवज्झाअ । हा । एव्वं बहु जाणन्तो वि मरन्ति ।

प्रविश्य माता चेटी च ।

चेटी । एदु एदु अत्ता ।

माता । कहिं कहिं मे दारिआ ।

चेटी । एसा अज्जुआ उय्याणे वालेण दट्ठा ।

माता । हा । हद म्हि मन्दभाआ ।

चेटी । अस्ससदु अस्ससदु अत्ता । एसा अज्जुआ सत्था चिट्ठदि ।

माता । णं पइदित्था जह । उपगम्य । जादे वसन्तसेणे । किं एदं ।

गणिका । वृषलवृद्धे । मा स्प्राक्षीः ।

माता । हद्धि । किं एदं ।

चेटी । अच्चारूढो से विसवेओ ।

माता । गच्छ सिग्घं । वेज्जं आणेहि ।

चेटी । अत्ते । तह । निष्क्रान्ता ।

ततः प्रविशति रामिलकश्चेटी च ।

चेटी । एदु एदु आवुत्तो । आवुत्तं अपेक्खन्ती सन्तप्पदि अज्जुआ ।

रामिलकः ।

इच्छामि तावदस्याः कलमधुरवचो मुखं विशालाक्ष्याः ।
मधुपव्रतो ऽभिपातुं विकसितमिव कोमलं कमलम् ॥ २७ ॥

उपेत्य । कथं मां दृष्ट्वा परावृत्तमुखी स्थिता । वस्त्रान्ते गृह्णन् ।

एतन्निवर्तय सुगात्रि मुखारविन्दम्
ईषत्तरङ्गपरिवृत्तमिवारविन्दम् ।
प्रीणाति नाम तव वक्त्रमसर्वदृष्टम्
अल्पाल्पपीतमिव पाणिपुटेन तोयम् ॥ २८ ॥

गणिका । भोस्तामिस्र । मुच्यतां मम वस्त्रान्तः ।

रामिलकः । भवति । किमिदम् ।

माता । जदप्पहुदि वालेण दट्ठा तदप्पहुदि असम्बद्धाणि मन्तेदि ।

रामिलकः । एवम् ।

व्यक्तमस्या गतं चेतस्ततः शून्ये तपस्विनी ।
शरीरे ऽन्येन केनापि सत्त्वयुक्तेन धर्षिता ॥ २९ ॥

प्रविश्य वैद्यश्चेटी च ।

चेटी । एदु एदु अय्यो ।

वैद्यः । कहिं सा ।

चेटी । एसा खु अज्जुआ सत्था ठिदा ।

वैद्यः । धरिसिदा खु महासप्पेण खादिदा भवे ।

चेटी । कहं अय्यो जाणादि ।

वैद्यः । महन्तं विआरं करेदि त्ति । † आणेहि । सव्वारम्भाणि दाव आरम्भिस्सं विसतन्ते † । उपविश्य मण्डलं रचयित्वा । कुण्डलकुडिलगामिणि । मण्डलं पविस मण्डलं । वासुइपुत्त । चिट्ठ चिट्ठ । शू शू । जाव सिरावेहं करिस्सं । कहिं कुठारिआ ।

गणिका । मूर्खवैद्य । अलं परिश्रमेण ।

वैद्यः । अइ । पित्तं पि अत्थि । अअं दे पित्तं वादं सेम्हं च णासेमि ।

रामिलकः । क्रियतां यत्नः । न खल्वकृतज्ञा वयम् ।

वैद्यः । सुन्दरगुलिअं वालवेज्जं आणेमि । निष्क्रान्तः ।

ततः प्रविशति यमपुरुषः ।

यमपुरुषः । भोः । भर्त्सितो ऽस्मि यमेन ।

न सा वसन्तसेनेयं क्षिप्रं तत्रैव नीयताम् ।
अन्या वसन्तसेना सा क्षीणायुस्तामिहानय ॥ ३० ॥

इति । यावदस्याः शरीरमग्निसंयोगं नोपनीयते तावत्सप्राणामेनां करोमि । विलोक्य । अये । उत्थिता खल्वियम् । भोः । किं नु खल्विदम् ।

अस्या जीवो मम कर उत्थितैषा वराङ्गना ।
आश्चर्यं परमं लोके भुवि पूर्वं न दृश्यते ॥ ३१ ॥

सर्वतो विलोक्य । अये । अत्रभवान्योगी परिव्राजकः क्रीडति । किमिदानीं करिष्ये । भवतु दृष्टम् । अस्या गणिकाया आत्मानं परिव्राजकशरीरे

न्यस्यावसिते कर्मणि यथास्थानं योजयिष्यामि । तथा कृत्वा ।

एते विप्रशरीरे ऽस्मिन्स्त्रीप्राणा विनियोजिताः ।
यथासत्त्वं यथाशीलं प्रायो यास्यन्ति विक्रियाम् ॥ ३२ ॥

निष्क्रान्तः ।

परिव्राजकः । उत्थाय । परहुदिए परहुदिए ।

शाण्डिल्यः । अविहा । पच्चाअदप्पाणो खु भअवो । आ । तक्केमि दुक्ख-भाइणो ण मरन्ति त्ति ।

परिव्राजकः । कहिं कहिं रामिलओ ।

रामिलकः । भगवन् । अयमस्मि ।

शाण्डिल्यः । भअवं । किं एदं । कुण्डिअग्गहणोइदं वामहत्थं सङ्खवलअ-पूरिदं विअ मे पडिभादि ।

परिव्राजकः । रामिलअ । आलिङ्गेहि मं ।

शाण्डिल्यः । किंसुअं आलिङ्गेहि ।

परिव्राजकः । रामिलअ । मत्ता खु अहं ।

शाण्डिल्यः । णहि णहि । उम्मत्तो खु तुवं ।

रामिलकः । भगवन् । आश्रमविरुद्धः खल्वयमालापः ।

परिव्राजकः । सुरं पिबामि ।

शाण्डिल्यः । विसं पिब । भोदु । परिहासप्पमाणं जाणिस्सं । णेव भअवो णेव अज्जुआ । भअवदज्जुअं णाम संवुत्तं ।

परिव्राजकः । परहुदिए परहुदिए । आलिङ्गेहि मं ।

चेटी । अपेहि ।

माता । जादे वसन्तसेणे ।

परिव्राजकः । इअ म्हि । अत्ते । वन्दामि ।

माता । भअवं । किं एदं ।

परिव्राजकः । अत्ते । पच्चभिजाणासि मं । रामिलअ । अज्ज चिराइदं खु तुए ।

रामिलकः । भगवन् । न वश्यो ऽस्मि ।

प्रविश्य **वैद्यः** । गुलिआ मए अट्ठ गहिदा । ओसहं च । खणे खणे जीविस्सदि मरिस्सदि त्ति । उपगम्य । उदअं उदअं ।

चेटी । इदं उदअं ।

वैद्यः । गुलिअं ओघट्ठआमि । अविहा । ण हु इअं दट्ठा । आविट्ठा खु इअं ।

गणिका । मूर्खवैद्य वृथावृद्ध । प्राणिनामन्तकमपि न जानीषे । कतमेनेयं सर्पेण व्यापादितेति वद ।

वैद्यः । किं एत्थ अच्छरिअं ।

गणिका । शास्त्रमप्यस्ति ।

वैद्यः । सत्थसहस्सं अत्थि ।

गणिका । ब्रूहि ब्रूहि वैद्यशास्त्रम् ।

वैद्यः । सुणादु भोदी ।

वातिकाः पैत्तिकाश्चैव श्लै- श्लै-...

अविहा । पुत्थअं पुत्थअं ।

शाण्डिल्यः । अहो वेज्जस्स अभिरूवदा । एक्कपदे वीसरिदो । होदु । मम वअस्सो एव्व । इदं पुत्थअं ।

वैद्यः । सुणादु भोदी ।

वातिकाः पैत्तिकाश्चैव श्लैष्मिकाश्च महाविषाः ।
त्रीणि सर्पा भवन्त्येते चतुर्थो नाधिगम्यते ॥ ३३ ॥

गणिका । अयमपशब्दः । त्रयः सर्पा इति वक्तव्यम् । त्रीणीति नपुंसकं भवति ।

वैद्यः । अविहा । वैआअरणसप्पेण खादिदा भवे ।

गणिका । कियन्तो विषवेगाः ।

वैद्यः । विसवेआ सदं ।

गणिका । न न । सप्त विषवेगाः । तद्यथा ।

रोमाञ्चो मुखशोषश्च वैवर्ण्यं चैव वेपथुः ।
हिक्का श्वासश्च सम्मोहः सप्तैते विषविक्रियाः ॥ ३४ ॥

सप्तविषवेगादतिक्रान्तो ऽश्विभ्यामपि न शक्यते चिकित्सितुम् । अथवा वक्तव्यमस्ति चेद्ब्रूहि ।

वैद्यः । ण हु अम्हाणं विसओ । णमो भोदीए । गच्छामि दाव अहं । निष्क्रान्तः ।

प्रविश्य **यमपुरुषः** । भोः ।

गर्भस्रवैश्च पिटकज्वरकर्णरोगैर्
गुल्माधिशूलहृदयाक्षिशिरोरुगाद्यैः ।
अस्मिन्क्षणे बहुविधैः खलु विद्रवैश्च
क्षिप्रं कृता यमपुराभिमुखाश्च जीवाः ॥ ३५ ॥

यावदहमपि भगवत्सन्देशमनुतिष्ठामि । गणिकामुपेत्य । भगवन् । मुच्यतां वृषल्याः शरीरम् ।

गणिका । छन्दतः ।

यमपुरुषः । यथास्वं जीवविनिमयं कृत्वा स्वकार्यमनुतिष्ठामि । तथा कृत्वा निष्क्रान्तः ।

परिव्राजकः । शाण्डिल्य शाण्डिल्य ।

शाण्डिल्यः । एसो भअवो सभावे पय्यवत्थिदो ।

गणिका । परहुदिए परहुदिए ।

चेटी । एसा अज्जुआ सभावेण मन्तेदि ।

माता । जादो वसन्तसेणे ।

रामिलकः । प्रिये वसन्तसेने । इत इतः ।

निष्क्रान्ता गणिका माता रामिलकश्चेट्यौ च ।

शाण्डिल्यः । भअवं । किं एदं ।

परिव्राजकः । महती खलु कथा । आवासे कथयिष्यामि । दिशो विलोक्य । गतो दिवसः । सम्प्रति हि

अस्तं गतो हि दिनकृद्गगनान्तलम्बी
मूषामुखस्थ इव तप्तसुवर्णराशिः ।
यस्य प्रभाभिरनुरञ्जितमेघवृन्दम्
आलक्ष्यते दहनगर्भमिवान्तरिक्षम् ॥ ३६ ॥

निष्क्रान्तौ

॥ भगवदज्जुकं नाम प्रहसनं समाप्तम् ॥

Zur Gestalt des Originaltextes

Der hier abgedruckte Originaltext beruht auf folgender Ausgabe:

Ach. *Bhagavadajjukiyam.* A Prahasana of Bodhayana Kavi with Commentary. Edited with critical notes and introduction by P. Anujan Achan. With a preface by M. Winternitz. Published from the Office of the Paliyam MSS. Library. Jayantamangalam (Trichur) 1925.

Diese Ausgabe enthält neben dem Text des Schauspiels den aus der ersten Hälfte des 17. Jh.s stammenden Kommentar *Diṅmātradarśinī* eines namentlich nicht bekannten Schülers des Nārāyaṇabhaṭṭa von Melputtūr (Kerala).

Vergleichend herangezogen wurden die Ausgaben:

Ba. „Bhagavadajjukam, Edited by Prof. A. P. Banerji-Śāstrī." In: *Journal of the Bihar and Orissa Research Society*, Vol. X, S. i–xxiii. Patna 1924.

Pr. *Bhagavadajjukam.* Bodhāyanaviracitam. [Herausgegeben von Veṭūri Prabhākaraśāstrī.] Madras 1925.

Die in der südindischen Manuskriptüberlieferung des Prākrit typischen Eigenheiten, die die Ausgabe Achan beibehalten hat, wurden in dem hier abgedruckten Text wie folgt behandelt: Die als ॰अ, ॰आ, ॰ए usw. geschriebenen Ligaturen wurden mit य्य, य्या, य्ये usw. wiedergegeben; für ळ steht immer ल, und die Verbindungen von Nasalen mit ह, die bei Achan zumeist als ह्ण und ह्म gedruckt sind, werden einheitlich als ण्ह und म्ह wiedergegeben. Die Orthographie wurde normalisiert; so steht Sanskrit सत्त्व statt सत्व usw., und das Präverbium सम् erscheint in den Sanskrit- und Prākritpassagen stets mit dem auf einen folgenden Verschlußlaut homoorganen Nasal. Auch die Interpunktion wurde vereinheitlicht.

Gelegentlich erschien es uns aus inhaltlichen oder formalen Gründen notwendig, vom Text der Ausgabe Achan abzuweichen. Diesbezügliche Erwägungen werden ausführlich in einem Aufsatz von Roland Steiner diskutiert (siehe oben die Literaturliste). Hier sollen daher die Änderungen, die wir an Achans Text vorgenommen haben, lediglich vermerkt werden. Dazu seien zwei formale Prinzipien festgehalten: Die Sandhiregeln des klassischen Sanskrit wurden, zuweilen gegen alle Ausgaben, strikt durchgeführt, wobei für ein anlautendes अ, das infolge eines externen Sandhi ausgefallen ist, stets der Avagraha (ऽ) eingesetzt wurde. Da die Überlieferung des Prākrit deutlich darauf hinweist, daß als einziger Dialekt die

Śaurasenī verwendet wird, haben wir isoliert auftretende Māhārāṣṭrī-Formen zu den entsprechenden Śaurasenī-Formen korrigiert.

Es folgt eine Liste sämtlicher Stellen, an denen wir vom Wortlaut der Ausgabe Achan abweichen. Dabei steht zuerst die Lesung von Achan; darauf folgt der hier hergestellte Text unter Angabe der Ausgaben und/oder von Achan zitierten Manuskripte (Mss.), die diese Lesung bezeugen.

S. 8,11 राजकुले तव > तव राजकुले mit Pr. und Ba. – **S. 10,8** उपदिसदु > उवदिसदु mit Ba. (उवादिसदु Pr.). – **S. 12,15** छिद्दिअ > छिन्दिअ mit Pr. und Ba. – **S. 14,2** गओ > गदो mit Pr. – **S. 16,1** कुतः nach भवति । *ex coniectura* getilgt – **S. 18,5** ताडेइ > ताडेदि mit Pr. – **S. 18,5** छिद्दीअदु > छिन्दीअदु mit Ba. – **S. 20,19** पोलाअणीए unsichere Lesung der Ed. Ach. (होलाअणीए Pr. und वोलआणीए Ba.) – **S. 22,1** प्रविशति > प्रविशतः mit Pr. – **S. 22,2** मोएथ > मोएध *ex coniectura* – **S. 22,10** चंपअज्जुण > चम्पअअज्जुण mit Pr. und Ba. – **S. 22,12** सत्तपण्ण > सत्तवण्ण mit Pr. – **S. 22,12** वण्णि > वण्हि mit Pr. – **S. 26,12** कालणादो > कारणादो mit Ach. (Corrigenda), Pr. und Ba. – **S. 26,15** मुण्डितो > मुण्डिदो mit Pr. und Ba. – **S. 28,2** तपः सारं > तपःसारं mit Ach. (Corrigenda), Pr. und Ba. – **S. 32,9** गायतः > गायति *ex coniectura* (und Ms. B) – **S. 32,13** घिदप्पक्खित्तं > घिदं पक्खित्तं mit Pr. und Ba. – **S. 34,7** अपेहि mit Pr., Ms. A und dem Kommentar hinzugefügt – **S. 34,8** कुविदुं > कुप्पिदुं mit den Mss. BFO und Pr. – **S. 34,12** भो > भोः mit Ach. (Corrigenda), Pr. und Ba. – **S. 36,9** अन्तर्हिताभाति > अन्तर्हिता भाति mit Pr. und Ba. – **S. 38,2** तथा करोति (Regieanweisung) nach सन्दंशकालः । mit den Mss. ADEF, Pr., Ba. und dem Kommentar ausgelassen – **S. 38,4 und 38,5** बालो > वालो mit Pr. und Ba. – **S. 38,7 und 38,8** बालेण > वालेण mit Pr. und Ba. – **S. 38,12** बाधेइ > बाधेदि *ex coniectura* – **S. 40,8** खु nach परित्तजदि mit Ms. A, Pr. und dem Kommentar ausgelassen – **S. 42,4** पव्वाजआ > पव्वाजिआ *ex coniectura* – **S. 42,4** कोञ्चि > कहिञ्चि *ex coniectura* (किंचि Pr.) – **S. 42,10** उपसप्पिअ > उवसप्पिअ mit Pr. und Ba. – **S. 42,12** कुविदुं > कुप्पिदुं mit den Mss. BFO und Pr. – **S. 42,16** जुज्जइ > जुज्जदि *ex coniectura* – **S. 42,22-23** अणहोमुहाणि तत्तहोदीए थणाणि जीवन्तीए > थणाणि अणहोमुहाणि तत्तहोदीए अधणस्स मम जीवन्तीए mit Pr. (अणधो zu अणहो und मह zu मम korrigiert; vgl. die Mss. FO und Ba.: अणहोमुहाणि तत्तहोदीए थणाणि अधणस्स मम जीवन्तीए) – **S. 44,6** गआ > गदा mit Pr. – **S. 44,13** कर्तव्याबोध्यतया आश्रमापवादं > कर्तव्याबोध्यतयाश्रमापवादं *ex coniectura* – **S. 44,16** शरीरे > शरीर *ex coniectura* – **S. 46,7** ततः

प्रविशति > प्रविश्य mit Pr., Ba. und dem Kommentar – **S. 46,10** बालेण > वालेण mit Pr. und Ba. – **S. 46,10** चिट्ठइ nach दट्ठा mit den Mss. BFO, Pr. und Ba. ausgelassen – **S. 46,12** चिट्ठइ > चिट्ठदि *ex coniectura* – **S. 48,2** कलमधुरवचोमुखं > कलमधुरवचो मुखं mit Pr. – **S. 48,11** बालेण > वालेण mit Pr. und Ba. – **S. 50,1-2** आणेहि अव्वारंभाणि, जाव आरंभिस्सं विसतन्तं > आणेहि । सव्वारम्भाणि दाव आरम्भिस्सं विसतन्ते unsicher hergestellter Text (दाव mit Pr. und Ba. statt जाव Ach. sowie विसतन्ते mit Pr. statt विसतन्तं Ach. und Ba.) – **S. 50,5** मूर्ख ! वैद्य ! > मूर्खवैद्य । mit Pr. – **S. 50,8** बालवेज्जं > वालवेज्जं mit Pr. – **S. 50,15** करे > कर *ex coniectura* – **S. 52,1** न्यस्य अवसिते > न्यस्यावसिते *ex coniectura* – **S. 52,4** निष्क्रान्तः । mit Pr. und Ba. ergänzt – **S. 52,11** णेव भअवो, णेवाज्जुआ । भअवदज्जुअं णाम संवुत्तं । mit Pr. nach पडिभादि । ausgelassen und auf S. 52,18 nach जाणिस्सं । eingefügt (णेवाज्जुआ zu णेव अज्जुआ korrigiert) – **S. 52,18-19** siehe S. 52,11 – **S. 54,5** (प्रविश्य वैद्यः) वैद्यः > प्रविश्य वैद्यः । mit Pr. und Ba. – **S. 54,9** मूर्ख ! वैद्य ! > मूर्खवैद्य । mit Pr. – **S. 56,6** सप्तविषवेगाः > सप्त विषवेगाः – **S. 56,9** अथ > अथवा mit Pr. und Ba. – **S. 56,13** (प्रविश्य यमपुरुषः) यमपुरुषः > प्रविश्य यमपुरुषः । mit Pr. – **S. 56,21** यथा स्वज्ञीवविनियमं > यथास्वं जीवविनिमयं mit Ba. und dem Kommentar – **S. 58,16** भगवदज्जुकीयं > भगवदज्जुकं mit Pr. und Ba.

Roland Steiner und Martin Straube